1

॥ श्रीरामहृदयम् ॥

॥ प्रारम्भः ॥ ॥ ॥

ाम.टीपं॰

श्रीगणेशाय नमः ॥ यः पृथ्वीभरवारणाय दिविजैस्संप्रार्थि
तश्चिन्मयः ॥ संजातः पृथ्वीतले रघुकुले मायामनुष्योऽव्ययः
॥ निश्चक्रं हतराक्षसः पुनरगाद्ब्रह्मत्वमा[illegible]द्यं स्थिरां ॥ की
र्तिं पापहरां विधाय जगतां तं जानकीशं भजे ॥ २ ॥ विश्वोद्भव
स्थिति लयादिषु हेतुमेकं मायाश्रयं विगतमायमचिंत्यमूर्तिम्
॥[illegible]॥ आनन्दसान्द्रममलं निजबोधरूपं ॥ सीतापतिं विदिततत्वमहं न ॥१॥
मामि ॥ ३ ॥ पठन्ति ये नित्यमनन्यचेतसः शृण्वन्ति वाध्यात्मि
कसंज्ञितं शुभं ॥ रामायणं सर्वपुराणसंमितं निर्धूतपापा ह
रिमेव यान्ति ते ॥ ४ ॥ अध्यात्मरामायणमेव नित्यं पठेद्यदी
छेद्भवबंधमुक्तिम् ॥ गवां सहस्रायुतकोटिदानजं फलं ल

प्रियोऽसि मे त्वं वद यत्त्वपृष्टम् ॥९॥ ज्ञानं सविज्ञानमथानुभक्तिवै
राग्ययुक्तं च मितं विभास्वत् ॥ जानाम्यहं योषिदपि त्वदुक्तं यथा त
था ब्रूहि तरन्ति येन ॥१०॥ पृच्छामि चान्यच्च परं रहस्यं तदेव चाग्रे
वद वारिजाक्ष ॥ श्रीरामचन्द्रेऽखिलतत्त्वसारे भक्तिर्दृढा नौर्भवति
॥२॥ प्रसिद्धा ॥११॥ भक्तिः प्रसिद्धा भवमोक्षणाय नान्यत्ततः साधनम ॥२॥
स्ति किंचित् ॥ तथापि हृत्संशयबंधनं मे विभेत्तुमर्हस्यमलो
३ क्तिभिस्त्वम् ॥१२॥ वदन्ति रामं परमेकमाद्यं निरस्तमायागुणसं
प्रवाहम् ॥ भजन्ति चाहर्निशमप्रमत्ताः परं पदं यान्ति तथैव सिद्धाः ॥
१३ वदन्ति केचित्परमोऽपि रामः स्वाविद्यया संवृतमानसात्तो ॥

मे घपश्चरेत्पान्तु नित्यम् ॥५॥ पुरारिगिरिसंभूता श्रीरामार्णवसंहि
ता ॥ अध्यात्मरामगङ्गेयं पुनाति भुवनत्रयम् ॥६॥ कैलासाग्रे क
दाचिद्रविशतविमले मन्दिरे रत्नपीठे संविष्टं ध्याननिष्ठं त्रिनय
नमभयं सेवितं सिद्धसंघैः ॥ देवी वामाङ्कसंस्था गिरिवरतनया
पार्वती भक्तिनम्रा प्राहेदं देवमीशं सकलमलहरं वाक्यमान
न्दकन्दम् ॥७॥ श्रीपार्वत्युवाच ॥ नमोऽस्तु ते देव जगन्निवास
सर्वात्मदृक् त्वं परमेश्वरोऽसि ॥ गोप्यं यदत्यन्तमनन्यवा
च्यं वदन्ति भक्तेषु महानुभावाः ॥८॥ पृच्छामि तत्त्वं पुरुषोत्त
मस्य सनातनं त्वं च सनातनोऽसि ॥ तदप्यहोऽहं तव देव भक्ता

रामहृदयं

नमो वदन्त्वहिरास्थितं लोकः ॥ सर्वान्तरस्थोऽपि निगूढ आत्मा स्वमायया
सृष्टमिदं विचष्टे ॥१९॥ जगन्ति नित्यं परितो भ्रमन्ति यत्सन्निधौ चुम्बक
लोहवद्धि ॥ एतन्न जानन्ति विमूढचित्ताः स्वाविद्यया संवृतमानसा
३ स्ते ॥२०॥ स्वाज्ञानमप्यात्मनि शुद्धबोधे ह्यारोपयन्तीह निरस्तमाये ॥ सं
सारमेवानुसरन्ति मूढाः पुत्रादिसक्ताः पुरुकर्मयुक्ताः ॥२१॥ जानन्ति ॥३॥
॥३॥ नैवं हृदये स्थितं वै चामीकरं कण्ठगतं यथाज्ञाः ॥ यथा प्रकाशो न तु वि
द्यते रवौ ज्योतिःस्वभावात्परमेश्वरे तथा ॥२२॥ विशुद्धविज्ञानघ
ने रघूत्तमेऽविद्या कथं स्यात्परतः परात्मनि ॥ यथा हि चाक्ष्णा भ्रमता गृ
हादिकं विनष्टदृष्टेर्भ्रमतीव दृश्यते ॥२३॥ तथैव देहेन्द्रियकर्तुरात्मन

जानाति नात्मानमन्येपरेण सम्बोधितो वेद परात्मतत्त्वम् ॥१४॥ यदि स्म
जानाति कुतो विलापः सीता कृतेऽनेन कृतोऽपरेण ॥ जानाति नैवं यदि
केन सेव्यः समो हि सर्वैरपि जीवजातैः ॥१५॥ अत्रोत्तरं किं विदितं भ
वद्भिस्तद्ब्रूहि मे संशयभेद वाक्यं ॥ जानाम्यहं येन हरेः स्वरूपं य
दस्वशम्भो अमलो निमित्त त्वम् ॥१६॥ श्रीमहादेव उवाच धन्या
ऽसि भक्तासि परात्मनस्त्वं यज्ज्ञातुमिच्छा तव रामतत्त्वं ॥ पुरा न केना
प्यभिचोदितोऽहं वक्तुं रहस्यं परमं निगूढम् ॥१७॥ त्वयापि भक्त्याप
रिचोदितोऽहं वक्ष्ये नमस्कृत्य रघूत्तमं ते रामः परात्मा प्रकृतेरना
दिरानन्द एकः पुरुषोत्तमो हि ॥१८॥ स्वमायया कृत्स्नमिदं हि सृष्ट्वा

4 ॥४॥ हनुमन्तमुरवेर्द्धतः ॥२९॥ अभिषिक्तः परिवृतो वशिष्ठाद्यैर्महात्मभिः ॥ सिं ॥४॥
हासने समासीनः कोटिसूर्य्यसमप्रभः ॥३०॥ दृष्ट्वा तदा हनूमन्तं प्राञ्ज
लिं पुरतः स्थितम् ॥ कृतकार्य्यं निराकांक्षं ज्ञानापेक्षं महामतिम् ॥३१॥
रामः सीतामुवाचेदं ब्रूहि तत्त्वं हनूमते ॥ निःकल्मषोऽयं ज्ञानस्य पात्रं
नो नित्यभक्तिमान् ॥३२॥ तथेति जानकी प्राह तत्त्वं रामस्य निश्चितम्
हनुमते प्रपन्नाय सीता लोकविमोहिनी ॥३३॥ सीतोवाच ॥ रामं विद्धि
परं ब्रह्म सच्चिदानन्दमद्वयम् ॥ सर्वोपाधिविनिर्मुक्तं सत्तामात्रम
गोचरम् ॥३४॥ आनन्दं निर्मलं शान्तं निर्विकारं निरञ्जनम् ॥ सर्व
व्यापिनमात्मानं स्वप्रकाशमकल्मषम् ॥३५॥ मां विद्धि मूलप्रकृतिं

कृतं परेशस्य जनो विमुह्यति ॥ नाहो न रात्रिस्सवितुर्यथा भवेत् ॥ प्रका
शरूपाव्यभिचारतः क्वचित् ॥ २४ ॥ ज्ञानं तथाज्ञानमिदं द्वयं हरौ रामे
कथं स्थास्यति शुद्धचिद्घने ॥ तस्मात्परानन्दमये रघूत्तमे विज्ञानरूपे
न हि विद्यते तमः ॥ २५ ॥ अज्ञानसाक्षिण्यरविन्दलोचने मायाश्रयत्वा
न्न हि मोहकारणम् ॥ ओंकारवाच्यस्त्वनादिदेवः स एव जातोऽयतुरा
म चन्द्रः ॥ २६ ॥ श्रीमहादेव उवाच ॥ अथ ते कथयिष्यामि रहस्यमपि
दुर्लभम् ॥ सीतारामहनुमत्सम्वादं मोक्षसाधनम् ॥ २७ ॥ पुरा रामा
यणे रामो रावणं देवकण्टकम् ॥ हत्वा रणे रणश्लाघी सपुत्रबलवाहनम् ॥
२८ ॥ सीतया सह सुग्रीवलक्ष्मणाभ्यां समन्वितः ॥ अयोध्यामगमद्रामो

रामहृदयं

रोधनम् ॥ ८३ ॥ रावणस्य वधो युद्धे सपुत्रस्य दुरात्मनः ॥ विभीषणो राज्यप्रदा
नं पुष्पकेन मया सह ॥ ८४ ॥ अयोध्यागमनं पश्चाद्राज्ये रामाभिषेचनम्
कर्मसि एवमादीनि मायैवाचरितान्यपि ॥ ८५ ॥ आरोपयन्ति रामेऽस्मिन्निर्वि
कारेऽखिलात्मनि ॥ अविद्यामोहिताये वै ननु विद्यायुता नराः ॥ ८५
रामो न गच्छति न तिष्ठति नानुशोचत्याकांक्षते न त्यजति न क
॥५॥ रोति किञ्चित् ॥ आनन्दमूर्तिरचलः परिणामहीनो मायागुणा ॥५॥
ननुगतो हि तथा विभाति ॥ ८६ ॥ श्रीमहादेव उवाच ॥ ततो रामः
S
स्वयं प्राह हनुमन्तमुपस्थितम् ॥ शृणु तत्त्वं प्रवक्ष्यामि ह्यात्मानात्म
परात्मनाम् ॥ ८७ ॥ आकाशस्य यथा भेदस्त्रिविधो दृश्यते महान्
जलाशये महाकाशस्तदवच्छिन्न एव हि ॥ ८८ ॥ प्रतिबिम्बाख्यमपर

स्थापयित्वा प्रसन्नकारिणीं मम् ॥ तस्यास्सन्निधिमात्रेण सृजाम्यहमतन्द्रिता
३६ ॥ तस्मान्निध्यानमपास्यैतस्मिन्नारोप्यते बुधैः ॥ अजोध्यानगरे ज
न्म रघुवंशेऽतिनिर्मले ॥ ३७ ॥ विश्वामित्रसहायत्वं मखसंरक्षणं ततः
॥ अहिल्याशापशमनं चापभंगो महेशितुः ॥ ३८ ॥ मत्पाणिग्रहणं पश्चा
द्भार्गवस्य मदक्षयः अजोध्यानगरे वासो मया द्वादशवार्षिकः ॥ ३९
दण्डकारण्यगमनं विराधवधमेव च ॥ मायामारीचमरणं सीतापा
नाहृतिस्तथा ॥ ४० ॥ जटायुषो मोक्षलाभः कबन्धस्य तथैव च ॥ शब
र्याः पूजनं पश्चात्सुग्रीवेण समागमः ॥ ४१ ॥ वालिनश्च वधः प
श्चात्सीतान्वेषणमेव च ॥ सेतुबन्धश्च जलधौ लङ्कापाश्चाव

रामहृदयम् ॥ समाप्तम्

नरा नरः ॥ मभ्द्क्ति हि नाप्नोति पापनलपादानवा...दपिराज्यतोऽ
धिकम् ॥ ५६ ॥ श्रीमहादेव उवाच ॥ एतत्तेऽभिहितं देवि श्रीरामहृद
यं मया ॥ अतिगुह्यतमं हृद्यं पवित्रं पापनाशनम् ॥ ५७ ॥ साक्षाद्रामे
णाकथितं सर्ववेदान्तसंग्रहम् । यः पठेत्सततं भक्त्या समुक्तो ना
त्रसंशयः ॥ ५८ ॥ ब्रह्महत्यादिपापानां बहुजन्मार्जितान्यपि नश्य
न्त्येव न संदेहो रामस्य वचनं यथा ॥ ५९ ॥ जातिभ्रष्टोऽतिपापी परधन
परदारेषु नित्यो घतो वा स्तेयी ब्रह्मघ्नोपि मातृपितृवधनिरतोपि
योगिवृन्दापकारी ॥ यस्संपूज्याभिरामं पठति च हृदयं रामचन्द्रस्य
भक्त्या । योगीन्द्रैरप्यलभ्यं पदमिह लभते सर्वदेवैश्च पूज्यः ॥ ६० ॥
इति श्रीब्रह्माण्डपुराणे उत्तरखण्डे उमामहेश्वरसंवादे अध्यात्म
रामायणे श्रीरामहृदयं नाम द्वितीयोऽध्यायः

रं दृश्यते त्रिविधं नभः ॥ ७ आवच्छिन्नचैतन्यमेकं पूर्णं तथापरम् ॥ ४९ ॥
आभासस्त्वपरं बिम्बभूतमेकं त्रिधा चितिः ॥ साभासबुद्धेः कर्तृत्वमवि
च्छिन्नेऽविकारिणि ॥ ५० ॥ साक्षिण्यारोप्यते भ्रान्त्या जीवत्वं च तथाऽ
बुधैः ॥ आभासस्तु मृषा बुद्धिः अविद्याकार्यमुच्यते ॥ ५१ ॥ अविच्छि
न्नं तु तद्ब्रह्म विच्छेदस्तु विकल्पितः ॥ अविच्छिन्नस्य पूर्णेन एकत्वं प्रति
पद्यते ॥ ५२ ॥ तत्त्वमस्यादिवाक्यैश्च साभासस्याहमस्तथा ॥ ऐक्यज्ञानं
यदोत्पन्नं महावाक्येन चात्मनोः ॥ ५३ ॥ तदाविद्या स्वकार्यैश्च नश्य
त्येव न संशयः ॥ एतद्विज्ञाय मद्भक्तो मद्भावायोपपद्यते ॥ ५४ ॥ मद्भ
क्तिविमुखानां हि शास्त्रगर्तेषु मुह्यताम् ॥ न ज्ञानं न च मोक्षः स्यात्तेषां
जन्मशतैरपि ॥ ५५ ॥ इदं रहस्यं हृदयं ममात्मनो मयैव साक्षात्कथितं

१२ ॥